**दिनाङ्क :- 09.03.2026** **प्रात: - 06:55**

**संसदः आयव्ययक-सत्रम्**

संसदः आयव्ययक-सत्रस्य द्वितीयचरणम् अद्य आरभ्य अग्रिममासस्य द्वितीयदिनाङ्कपर्यन्तं च प्रचलति। लोकसभायाम् अद्य अध्यक्षस्य ओम् बिरला-वर्यस्य निष्कासनार्थं प्रस्तावः अपि प्रस्तावितः भविष्यति। मोहम्मद् जावेदः, के. सुरेशः, मल्लु रवि: च काङ्ग्रेस्-पक्षस्य त्रिभिः सदस्यैः प्रस्तावः प्रस्तूयते। यदि लोकसभायां प्रस्तावः स्वीकृतः भविष्यति तर्हि श्रीबिरला कार्याचरणस्य अध्यक्षतां न करिष्यति, सः सदस्यानां मध्ये एव स्थास्यति। विदेशमन्त्री डा. एस्. जयशङ्करः अपि लोकसभायां पश्चिम-एशियायाः स्थित्यां वक्तव्यं प्रदाष्यति।

**प्रधानमन्त्री-वेबिनार:**

प्रधानमन्त्री नरेन्द्रमोदी अद्य आभासीय-मध्यमेन "सबका साथ, सबका विकासः- जनानां आकांक्षानां पूर्तिः" इत्यस्मिन् विषये आयव्ययक-वेबिनार्-उत्तराभिसंबोधनं करिष्यति। अस्य विषयस्य अन्तर्गतं, शिक्षा-कौशलम्, स्वास्थ्यं, आयुष्, पर्यटनं, आतिथ्यम् इत्यादिषु क्षेत्रेषु बहुविधानि ब्रेक्-औट्-सत्राणि आयोक्ष्यन्ते। चर्चासु पूर्वोत्तरक्षेत्रे शिक्षायाः आजिविकायाः मार्गस्य निर्माणम्, एनिमेशन् इत्यस्य विकासादि उपक्रमाः समाविष्टाः भविष्यन्ति।

**प्रधानमन्त्री- नवदिल्ल्यां**

प्रधानमन्त्री नरेन्द्रमोदी ह्यः नवदिल्ल्यां प्रायः पंचशतोत्तर-त्रयस्त्रिंशत्-सहस्र-कोटि-रूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनम्, शिलान्यासं च विहितवान्। अवसरे अस्मिन् श्री मोदी अवदत् यत्, राष्ट्रिय-राजधान्यां सुविधाः, अवसंरचना च निरन्तरं सुदृढाः विस्तारिताः च क्रियन्ते।

प्रधानमन्त्री अवदत् यत्, अद्य उद्घाटिताः नूतनः मेट्रो-विभागाः राजधान्याः निवासिनां कृते महत्त्वपूर्णं लाभं प्रदास्यति। सः देहली-मेट्रो इत्यस्य द्वयोः नूतनयोः मार्गयोः अपि उद्घाटनम् अकरोत्। एते मार्गाः राष्ट्रिय-राजधान्याः अनेकेभ्यः महत्त्वपूर्णेभ्यः स्थानेभ्यः साक्षात् सम्पर्कं प्रदास्यन्ति।

-

**सुपर् लीडरः**

इरान्- देशस्य दिवङ्गतस्य सर्वोच्चनेतुः पुत्रः मोजताबा खामेनेई इत्येषः तस्य उत्तराधिकारी नामाङ्कितः अस्ति। इरान्-देशस्य राज्य-प्रवहिकया घोषितं यत् इरान्-देशस्य पारामिलिटरी-रिवोल्यूशनरी-गार्ड्-कार्प्स् (आई. आर्. जी. सी.) इत्येनेन नूतनं नेतारं प्रति निष्ठायाः सङ्कल्पः स्वीकृतः। परन्तु अमेरिका-देशस्य राष्ट्रपतिः डोनाल्ड-वर्यः गतसप्ताहे आक्सियोस् इत्यनेन सह वार्तालापं कुर्वन् उक्तवान् आसीत् यत् खामेनेई इत्यस्य पुत्रः तस्मै अस्वीकार्यः भविष्यति इति। सः सूचितवान् यत् ईरान्-देशस्य अग्रिमनेतृत्वं निर्णेतुं संयुक्तराज्यामेरिका-देशस्य भूमिका भवेत् इति, तस्य अनुमोदनं विना कोपि नूतनः नेता दीर्घकालं यावत् न स्थास्यति इति।

**क्रिकेट्**

गतरात्रौ अहमदाबादस्य नरेन्द्र मोदी-क्रीडाङ्गणे निर्णायकक्रीडायां भारतीय-दलेन न्यूज़ीलैण्ड्-दलम् षण्णवति धावनांकैः पराजित्य आई. सी. सी. पुरुषाणां विंशतिं प्रति विंशति विश्वचषक-उपाधिं तृतीयवारं विजित्य ऐतिह्यं विरचितम्।

राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः, प्रधानमन्त्री नरेन्द्रमोदी च विश्वचषक-विजयाय भारतीयक्रिकेट-दलं अभिनन्दितवन्तः।